## ५८. मित्रसाहाय्यम्

तुमुन्/क्तवतु

नवीनः - तपनः आगतवान् आसीत्। श्वः प्रातःकाले आगमिष्यामि इति उक्त्वा गतवान्।

भास्करः - भवान् उपविशतु इति न उक्तवान् किम् ?

नवीनः - अहम् उक्तवान् तथापि सः गतवान्। तस्य मुखे खेदः आसीत्।

भास्करः - सः एकम् उद्योगं प्राप्तुम् इच्छति। किन्तु तत्रत्य अधिकारी उत्कोचम् इच्छति। एषः तपनः कथं धनं दातुं शक्नोति ?

नवीनः - अतः एव मां किमपि न उक्तवान्। भवान् नास्ति इति श्रुत्वा तथैव निर्गतवान्।

भास्करः - अहं श्वः अपि प्रातः एव गमिष्यामि। सः आगच्छति चेत् एतत् धनं ददातु। अनन्तरं दूरवाणीं कर्तुं वदतु।

नवीनः - तपनः गृहे प्रष्टुं न शक्नोति वा ?

भास्करः - तपनस्य गृहे अपि तावद् धनं दातुं समर्थाः न। तेषां मध्यमस्तरीयकुटुम्बः। तिस्रः भगिन्यः अपि सन्ति। एषः एकः एव पुत्रः। कुटुम्बपोषणमपि कष्टमेव।

नवीनः - तपनस्य भवतः च कथं परिचयः।

भास्करः - तपनस्य पिता, मम पिता च स्नेहितौ। अहमपि तयोः स्नेहसम्बन्धं रक्षितुम् इच्छामि। तपनः अतीव विधेयः युवकः, गुणी च।